केचिदपि प्रवर्त्तन्ते” आत्मत० शिरोमणिः [शब्दमा०

**क्षणरामिन्** पुंस्त्री० क्षणेक्षणे रमते रम–णिनि । पारावते

**क्षणिक** त्रि० क्षणः स्वसत्ता व्याप्यतयाऽस्त्यस्य ठन् । क्षणमात्रस्थायिनि । तल्लक्षणञ्च आत्मतत्त्वविवेकव्याख्याने रघुनाथशिरमण्युक्तम् यथा

“क्षणिकत्वञ्च स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वम् उत्पत्तिमत्त्वं वा । उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्धः । क्षणश्च स्वाधेयपदार्थप्रागभावानाधारः समयः प्रसिद्धस्तु विधेर्नैयायिकानां प्रागभावे चरमध्वंसे च, निषेधस्य बौद्धानामलीके, स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्वं क्षणिकत्वमिति तु न्यायः” । अत्र गदाधरव्याख्या कादाचित्कशब्दे १८८२ पृ० दर्शिता अत्र कादाचित्कत्वं सत्त्वे सति किञ्चित्कालवृत्त्यभावप्रतियोगित्वम् । “क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्” मुक्ताव० । २विद्युति स्त्री हेम०

**क्षणित** त्रि० क्षणः संजातोऽस्य तार० इतच् । जातक्षणे

**क्षणिन्** त्रि० क्षणः विश्रान्तिकालः उत्सवो वाऽस्त्यस्य इनि । क्षणात् १विश्रान्ते २उत्सवान्विते च । “तं विश्रान्तं शुभे देशे क्षणिनं कल्यमच्युतम्” भा० स० १२अ० । स्त्रियां ङीप् सा च ३रात्रौ शब्दर०

**क्षणेपाक** पु० क्षणे पच्यते पच–कर्म्मणि घञ् न्यङ्क्वा० कु अलुक्स० । क्षणेन पच्यमाने पदार्थे । [च वाच्यम् ।

**क्षत्** स्त्री० क्षण–भावे संप० क्विप् । हनने१विदारणे२पीडने

**क्षत** त्रि० क्षण–क्त । १विदारिते २पीड़िते ३वर्षिते च । “रवोरवःस्थ्रमभ्रेन पत्रिणा हृदि क्षतोगोत्रभिदप्यमर्षणः” रघुः । ४क्षतियुक्ते “रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः” कुमा० “क्षततिमिरेषु दिगन्तमुखेषु” भट्टिः क्षतयोन्या अपि स्त्रियाः” “कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता” इति च नारदः । विदारणञ्च शस्त्रादिभिरवयवविभागः, “अङ्गुलीयोरगक्षता” रघुः । सर्पेण दशनेनाङ्गुल्या विदारणात्तथात्वम् । भावे क्त ।५विदारणे न० “नखक्षतानीव वनस्थलीनाम्” कुमा० “अनलङ्कृतोऽपि सुन्दर ! हरसि मनोमे यतः प्रसभम् किं पुनरलङ्कृतस्त्वं नखरक्षतैस्तस्याः” सा०द० । ६घर्षणे “क्षतोज्ज्वलाङ्कुशनखांशुभिन्नया” माघः । उपचारात् तत्कार्य्ये ७दुःखादौ “क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दोभुवनेषु रूढः” रघुः उपचारात् (घा) इति प्रसिद्धे स्रवद्रक्तपूयादौ ८व्रणे हेमच० “प्रकुपितास्तु दोषामेदमभिपन्नामांसशोणिते प्रदूष्य कण्डूं जनयन्ति तत्र कण्डूयनात् क्षतं समुपजायते क्षते दुष्टमांसजाः प्ररोहाः पिच्छिलरुधिरस्राविणो जायन्ते कूर्चकिणोऽभ्यन्तरमुपरिष्टाद्वा” सुश्रु० “यस्तु क्षतेषूपयुज्यते स भूयःकल्क इति संज्ञां लभते” सुश्रु० व्रणशब्दे विवृतिः ।

क्षतनिमित्तमरणेऽशौचभेदमाह शु० त० व्याघ्रः “क्षतेन म्रियते यस्तु तस्याशौचं भवेद्विवा । आ सप्ताहाच्चिरात्रं स्यात् दशरात्रमतः परम् । शस्त्रघाते त्र्यहादूर्द्ध्वं यदि कश्चित् प्रमीयते । अशौचं प्राकृतं तत्र सर्ववर्णेषु नित्यशः” । “अत्र शस्त्रघातपदं क्षतेतरशस्त्रघातपरं पारिभाषिकशस्त्रघातपरमपि । यथा देवीपु० “पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः । पतनानशनप्रायैर्वज्राग्निविषबन्धनैः । मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः” । अन्यथा क्षतं विना पतनादिभिर्विलम्बमृतानां दिनत्रयग्रहणेऽनध्यवसायः स्यात् । न च शास्त्रीये व्यवहारेऽन्तरङ्गत्वेन पारिभाषिकग्रहणस्यैव युक्तत्वमिति वाच्यम् आद्ये पारिभाषिकापारिभाषिकयोरुभयोर्ग्रहणवदत्रापि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः” शु०त०

**क्षतकास** पु० ५त० । क्षतजाते कासभेदे “पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः” भावप्र० । कासशब्दे २०४२पृ० विवृतिः [शब्दच० । २लाक्षायां स्त्री हेम० ।

**क्षतघ्न** पु० क्षतं हन्ति हन हेतौ-क । (कुकुरशोँगा) क्षुपभेदे ।

**क्षतज** न० क्षतात् जायते जन-ड । १रुधिरे “अमरः सच्छिन्नमूलः क्षतजेन रेणुः” रघुः “क्षतजकणवर्षबभ्रुणा च भ्रमता” काद० २पूये हेम० । ३क्षतजातमात्रे त्रि० । सुश्रुतोक्ते ४कासभेदे कासशब्दे तद्विस्तार उक्तप्रायोऽपि स्पष्टार्थं सुश्रुतवाक्यमत्रोदाह्रियते यथा

“उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः । कासस्यापि च विज्ञेयास्त एवोत्पत्तिहेतवः । धूमोपघातादृजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव । प्राणोह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा सदोषः कासः स विद्भिरुदाहृतस्तु । स वातपित्तप्रभवः कफाच्च क्षतात्तथान्यः क्षयजोऽपरश्च । पञ्चप्रकारः कथितो भिषग्भिर्विवर्द्धितो यक्ष्मविकारकृत् स्यात् । भविष्यतस्तस्य तु कण्ठकण्डूर्भोज्योपरोधो गलताल्वलेपः । स्वशब्दवैषम्यमरोचकोऽग्निसदश्च लिङ्गानि भवन्त्यमूनि ।